* H C Q - 0 0 1 - 0 0 1 5 3 3 *

# HCQ-001-001533

Seat No. ________

## Third Year B. A. (Sem. V) (CBCS) Examination

**October – 2017**

## Sanskrit : Paper-XV

***(Sanskrit Bhasha and Sahitya)***

*(शुकनासोपदेश – अर्थविबोध – संस्कृत निबन्धः)*

***(Old Course)***

**Faculty Code : 001**

**Subject Code : 001533**

Time : $2\frac{1}{2}$ Hours] [Total Marks : **70**

१ (અ) નીચેનામાંથી કોઈપણ **એક** ગદ્યખંડનો અનુવાદ કરો : ८

1 (A) Translate any **one** of the following passage : 8

(१) यौवनारंभे च प्रायः शास्त्रजलप्रक्षालननिर्मलापि कालुष्यमुपयाति बुद्धिः । अनुज्झितधवलतापि सरागैव भवति यूनां दृष्टिः । अपहरति च वात्येव शुष्कपत्रं समुद्भूतरजो भ्रान्तिरतिदूरमात्मेच्छया यौवन समये पुरूषं प्रकृतिः । इन्द्रिय हरिणहारिणी च सततदुरन्ता इयम् उपभोगमृग तृष्णिका । नवयौवनकषायितात्मनश्च सलिलानीव तान्येव विषयस्वरूपाण्यास्वाद्यामानानि मधुरतराण्यापतन्ति मनसः । नाशयति च दिङ्मोह इवोन्मार्गप्रवर्तकः पुरुषमत्यासंगो विषयेषु । भवादृशा एव भवन्ति भाजनान्युपदेशानाम् ।

(२) न परिचयं रक्षति । नाभिजनमीक्षते । न रूपमालोकयते । न कुलक्रममनुवर्तते । न शीलं पश्यति । न वैदग्ध्यं गणयति । न श्रुतमाकर्णयति । न धर्ममनुरुध्यते । न सत्यमवबुध्यते । न त्यागमाद्रियते । न विशेषज्ञतां विचारयति । नाचारं पालयति । न सत्यमवबुध्यते । न लक्षणं प्रमाणीकरोति गंधर्वनगरलेखेव पश्यत एव नश्यति ।

(બ) નીચેનામાંથી કોઈપણ **બે** સંદર્ભ સહિત સમજાવો : ६

(B) Explain any **two** of the following with reference to the context : 6

(१) तृष्णाविषमूर्च्छिताः कनकमयमिव सर्व पश्यन्ति ।

(२) चन्दनप्रभवो न दहति किमनलः ।

(३) कामं भवान् प्रकृत्यैव धीरः ।

(४) सरस्वतीपरिगृहीतमीर्ष्ययेव नालिङ्गतिजनम् ।

૨ નીચેનો પરિચ્છેદ વાંચી, તેની નીચે આપેલા પ્રશ્નોના ઉત્તર સંસ્કૃતમાં લખો : (ગમે તે એક) **૧૪**

**2** Read the following passage and write answer in Sanskrit to the question given below it : (any **one**) **14**

(१) दक्षयज्ञध्वंसानन्तरं शिवः हिमालये तपस्तप्यत् । हिमालयदुहिता पार्वती सखीद्वयसहिता शिवपरिचर्यां कृतवती । एकदा शिवः तपोमग्नः आसीत् । तदैव कामदेवः तत्स्थानं समायातः स्वमित्रेण वसन्तेन सहितः । शीताः पवनाः सर्वत्र प्रसृताः । पुष्पाणां सुगन्धश्च सर्वत्र व्याप्तः । भ्रमराणां गुञ्जनेन मुखरितं जातं तत्स्थानम् । कामदेवेन स्वप्रसिद्धधनुषि बाणममोघं समधत्तम् । तत्क्षणमेव शिवस्य मनासिक्षोभानुभूतिः सञ्जाता । सः नयनोद्‌घाटनमकरोच्छनैः शनैः ।

**प्रश्नाः –**

(१) पार्वती किं कृतवती ?

(२) कः केन सह समायातः ?

(३) तत्स्थानं कीदृशं जातम् ?

(४) पुष्पाणां सुगन्धः कुत्र व्याप्तः ?

(५) एकदा शिवः किमासीत् ?

(६) कामदेवः किं कृतवान् ?

(७) तत्क्षणं किं जातम् ?

(२) अस्ति भागीरथीतीरे गृध्रकूटनाम्नि पर्वते महान पर्कटीवृक्षः । तस्य कोटरे दैवदुर्विपाकात् गलितनखनयनो जरद्‌गवनामा गृध्र प्रतिवसति । अथ कृपया तज्जीवनाय तद् वृक्षवासिनः पक्षिणः स्वाहारात्किंचित्किंचिदुध्धृत्य ददति । तना सौ जीवति । शावकानां रक्षणं करोति । अथ कदाचिद् दीर्घकर्ण नामा मार्जारः पक्षिशावकान्भक्षयितुं तत्रा गतः ततस्तमायान्तं दृष्टवा पक्षिशावकैर्भयर्तैः कोलाहलः कृतः । तच्छुत्वा जरद्‌गवेनोक्तम् कोऽयमायाति । दीर्घकर्णो गृध्रमवलोक्य सभयमाह – हा हतोऽस्मि । यतः तावद् भयस्य भेतव्यं यावद् भयमनागतम् ।

आगतं तु भयंवीक्ष्य नरः कुर्याद् यथोचितम् ॥

अधुनास्य सन्निधाने पलायितुमक्षमः । तद्यथा भवितव्यं तद्‌भवतु । तावद् विश्वासमुत्पाद्यास्य समीपमुपगच्छामि । इत्यालोव्योपसृत्याब्रवीत् – आर्य त्वामभिवन्दे । गृध्रोऽवदत् – कस्त्वम् । सोऽवदत् – मार्जारोऽहम् । गृध्रो ब्रूते – दूरमपसर । नो चेत् हन्तव्योऽसिमया । मार्जारोऽवदत् – श्रुयतां तावदस्मद्वचनम् । ततो यद्यहं बध्यस्तदाहन्तव्यः ।

प्रश्नाः –

(१) किदृशः गृध्रः भागीरथी तीरे प्रतिवसति । किं नामधेयं गृध्रः ?

(२) गृध्रस्य जीवनाय वृक्षवासिनः पक्षिणः किं ददति ?

(३) पक्षिशावकान् भक्षयितु तत्र कः आगतः ?

(४) भयस्य कदा भेतव्यम् ?

(५) गृध्रः मार्जारं किं कथयति ?

(६) मार्जारं आयान्तं दृष्ट्वा पक्षिशावकैः किं कृतम् ?

(७) किं नाम धेयं मार्जारः ?

૩ નીચે આપેલ પત્રના વિષયને અનુલક્ષીને સંસ્કૃતમાં પત્ર લખો : (કોઈપણ **એક**) **૧૪**

**3** Write letter in Sanskrit on any **one** of the following subjects : **14**

(१) छात्रः स्वअग्रजस्य विवाहप्रसंगे स्वगृहं गच्छति । पुनरागमने विलम्बः भविष्यति । अतः अवकाश विलम्बनार्थं स्वस्य अध्यापकाय पत्रं लिखति ।

(२) वक्तृत्वस्पर्धायां श्लोकगानस्पर्धायाञ्च प्रथमक्रमाङ्क प्राप्तवान् पुत्रः स्वपितरं प्रति पत्रं लिखति ।

**૪** નીચેનામાંથી કોઈપણ **એક** પર સંસ્કૃતમાં નિબંધ લખો : **૧૪**

**4** Write an eassy in Sanskrit on any **one** of the following : **14**

(१) धनमहिमा ।

(२) गीता सुगीता कर्तव्या ।

(३) विद्याधनं सर्वधनप्रधानम् ।

(४) सत्यान्नास्तिपरोधर्मः ।

**૫** નીચેનામાંથી કોઈપણ **બે** પર ટૂંકનોંધ લખો : **૧૪**

**5** Write short notes on any **two** of the following : **14**

(૧) બાણભટ્ટનું જીવન

(1) Life of बाणभट्ट

(૨) લક્ષ્મી વિશે બાણનાં વિચારો

(2) The Thoughts of बाण about लक्ष्मी

(૩) શુકનાસના ઉપદેશનો ઉદ્દેશ

(3) The motive behind the deliverance of 'Shuknas'.

(४) शुकनासउपदेश गुरु विचाराः ।